Shri Raghunatha Temple MSS. Library,
JAMMU

No. ६२४ - घ

Title श्रावणीकर्म सूत्रपद्धतिः

Author

Extent ७ Age

Subject धर्मशास्त्रम्. अपूर्णम्

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

नं० ६२४ — घ

गौड दाक्षिणात्य स्नावली कर्म (
सूत्र पद्धति: (अपूर्णा)
नं० ५२४ — घ (बट)
पत्राणि ६ (अपूर्णम)

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

नं० ६२४-च

गौडदाक्षिणात्यश्रावणीकर्म (धर्मशास्त्रम्)

सूत्रपद्धति:

पत्राणि ७ (बहु) (अपूर्णा)

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

ओं उदाह्रितान्तस्नावणीकर्म ८१

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

ली

१ ॥श्रीगणेशायानमः॥ अथप्रश्रावकर्म॥ आदौस्नानविधिनास्नानं॥ तत्रमृद्गोमयकुश
यवतिलपुष्पाणिउपवीतचंदनादूर्वामापामार्गादीनिचगृहीत्वा॥उदकांतंगृहीत्वाशु-
चौदेशेस्थापयेत्॥ ततोहस्तोपादौप्रक्षाल्यकुशोपग्रहंकृत्वाशिखांवध्वाआचम्यप्राणाना
यम्यपौराणमंत्रैर्नमस्कारपूर्वकंतीर्थस्नानानुज्ञांप्रार्थयेत्॥ उत्तिष्ठंतुमहाभूतायेभू-
ताभूमिवासिनः॥भूतानामविरोधेनस्नानकर्मसमारभेत्॥१॥ अपसर्पंतुतेभूताये
चात्रतीर्थरोधकाः॥ येभूताविघ्नकर्तारस्तेनश्यंतुशिवाज्ञया॥२॥ पुष्कराद्यानिती
र्थानिगंगाद्याःसरितस्तथा॥ आगच्छंतुपवित्राणिस्नानकालेसदामम॥३॥ अतितीक्ष्ण
महाकायकल्पांतदहनोपमभैरवायनमस्तुभ्यंमनुज्ञांदातुमर्हसि॥४॥ अयामधि-

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

१

पतिः संचतीर्थेषु वसतिस्तव ॥ वरुणाय नमस्तुभ्यं स्नानानुज्ञां प्रयच्छ मे ॥५॥ अधिष्ठात्र
क्ष्यतीर्थानां तीर्थे शुचि चरंति याः ॥ देवतास्ताः प्रयच्छंतु स्नानाज्ञां मम सर्वदा ॥६॥ गंगे च
यमुने देवि गोदावरि सरस्वति ॥ नर्मदे सिंधु कावेरि जले स्मिन् संनिधिं कुरु ॥७॥ ततो वे
दमंत्रैर्जलांजलिप्रक्षेपः ॥ पावकानः ॥ पावका नः सरस्वती वाजेभिर्वाजिनीवती यज्ञं व
ष्टु धियावसुः ॥१॥ महो ऽर्णः ॥ महो ऽर्णः सरस्वती प्रचेतयति केतुना धियो विश्वा र
विराजति २ पंचनद्यः पञ्चनद्यः सरस्वतीमपियन्ति सस्रोतसः सरस्वती तु पञ्चधा
सो देशे भवत्सरित् ४ अम्बावती गोमतीः अम्बावतीर्गोमतीर्न ऽ उभासो वीरवतीः
सदमुच्छंतु भद्राः घृतं दुहाना विश्वतः प्रपीता यूयं पात स्वस्तिभिः सदा नः ५ आपो

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

२ हि आपो हि ष्ठा मयोभुवस्ता न ऽ ऊर्ज्जे दधातन महे रणाय चक्षसे ६ यो वः शिवतमो र
सस्तस्य भाजयतेह नः उशतीरिव मातरः ७ तस्मा ऽ अरम् तस्मा ऽ अरंगमाम वो ययजि
न्वथा आपो जनयथा च नः ८ आवाहनं तत्तउरू ठं हिराजे त्विनोयमा मंत्रयेतेशतमित्सा
वर्त्तयेत् सुमित्रया न इत्यपोंजलिना आपि आदाय दुर्मित्रिया इति द्वेष्यं प्रति नि षिंचे
त् तस्मा ऽ अरम् मा हिः माहि र्भूर्मा पृदाकुः उरु ८ उरुं हि राजा वरुणश्चकार सूर्याय
पंथामन्वेतिवा ऽ उ अपदे पादा प्रतिधातवेकरुतापवक्ता हृदयाविधश्चित् नमो वरुणायाभि
ष्ठितो वरुणस्य पाशः येते शतं वरुण ये सहस्रं यज्ञियाः पाशा वितता महान्तः तेभिर्नो अ
द्य सवितोत विष्णुर्विश्वे मुंचंतु मरुतः स्वर्काः स्वाहा ९ सुमित्रियानः सुमित्रिया न ऽ आय

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

र्षधयः सन्तु दुर्मित्रियास्तस्मै सन्तु योस्मान्द्वेष्टि यंच वयं द्विष्मः १० ततो विष्णु
संस्मरणं अद्येत्यादि देशकालौ स्मृत्वा मासे पक्षे तिथौ मम मानसवाचिककायिक
पापक्षयद्वारा श्रीविष्णोः प्रीतयेदं दसामुत्सर्गकर्मणः निमित्तं तदंगतया स्नानवि
धिना स्नानमहं करिष्ये ततो वामहस्तेन कटिवस्त्र हृजंघे चरणौ करोमि ह्रिः स्थि स्थिः
प्रक्षाल्याचामेत् ततो वरुणाय नमः इति वरुणं अभ्यो नम इत्युदक्षिणादकं चनम
स्कृत्य दक्षिणहस्तेन नाभेरूर्ध्वं गामिम्र देदं विष्णुरित्यालभेत् अश्वक्रान्ते रथक्रां
ते विष्णुक्रान्ते वसुंधरे उद्धृतासि वराहेन कृष्णेन शतबाहुना मृत्तिके हर मे पापं यन्मर
यापूर्वसंचितं मितिच ततः सूर्याभिमुखो निमज्जेदापो अस्मानिति स्नात्वा उ

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

३ द्विदाप्स इत्युन्मज्जेत् पुनस्त्रीन्निमज्ज्योन्मज्याचेत् ततो गोमयेन सर्वाङ्गानि विलेपन्मा
नस्तोक इति अग्रमश्वचरन्तीनामोषधीनां रसं वने तासामृषभपत्नीनां पवित्रं काय
शोधनं यन्मेरोगं च शोकं च तन्मे हरतु गोमयं ततोऽभिषिञ्चेत् इमंमे इमं मे वरुण श्रुधी ह
वमद्या च मृडय त्वामवस्युराचके २२ तत्त्वा यामि ब्रह्मणा वन्दमानस्तदाशास्ते य
जमानो हविर्भिः अहेडमानो वरुणेह बोध्युरुशंस मा न आयुः प्रमोषीः २२ त्व
न्नोऽअग्ने वरुणस्य विद्वान्देवस्य हेडोऽअवयासिसीष्ठाः यजिष्ठो वह्नितमः शोशु
चानो विश्वा द्वेषांसि प्रमुमुग्ध्यस्मत् २३ स त्वम स त्वन्नोऽअवमो भव मो भवोती
नेदिष्ठोऽअस्याऽउषसो व्युष्टो अवयक्ष्व णो वरुणं रराणो वीहि मृडीकं

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

सुहवो नऽ एधि २४ मापः मापो मोषधीर्हिंसीर्धाम्नो राजँस्ततो वरुण नो मुंच
यदाहुरघ्न्याऽइति वरुणेति शपामहे ततो वरुण नो मुञ्च २५ मुञ्चन्तु मा मु
ञ्चन्तु मा शपथ्यादथो वरुण्यादुत अथो यमस्य पड्वीशात्सर्वस्माद्देवकिल्बि
षात् २६ अवभृथ निचुम्पुण अवभृथ निचुम्पुण अवभृथ निचुम्पुण नि
चेरुरसि निचुम्पुणः अव देवैर्देवकृतमेनोयासिषमव मर्त्यैर्मर्त्यकृतं पुरुराव्णो
देव रिषस्पाहि २७ काण्डात्काण्डात्प्ररोहन्ती काण्डात्प्ररोहन्ती परुषःपरुष
स्परि एवा नो दूर्वे प्रतनु सहस्रेण शतेन च २८ इति दूर्वामार्जनम् अपाघम् अ
पाघमप किल्बिषमप कृत्यामपो रपः अपामार्ग त्वमस्मदप दुःष्वप्न्यं

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

४ सुवः १९ निमज्योन्मज्य्या चम्रद्मैं एतमानं पावयेत् ओंकारेण व्याहृतिभिर्गाय
५ त्र्या च ओं भूर्भुवः स्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नं प्रचोद
यात् २० आपो हि ष्ठा मयो भुवस्ता नऊर्जे दधातन महे रणाय चक्षसे २ यो वः शि
वतमो रसस्तस्य भाजयतेह नः उशतीरिव मातरः ३ तस्मा ऽ अरम् तस्मा ऽ
अरंङ्ग, मामवो यस्य क्षयाय जिन्वथ आपो जनयथा च नः ४ इदमापः प्रवह
इदमापः प्रवहता वद्यं च मलं च यत् यच्चाभिदुद्रोहानृतं यच्च शेपे ऽ अभीरु
णम् आपो मा तस्मादेनसः पवमानश्च मुञ्चतु ५ हविष्मतीरिमा ऽ आपो
हविष्मां ँ २ ऽ आविवासति हविष्मान् देवो ऽ अध्वरो हविष्मां २ अ

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

सुसर्यः देवीरापः देवीरापोऽपांनपाद्योवऊर्मिर्हविष्यऽइन्द्रियावान्मदिन्तमः
तंदेवेभ्यो देवत्रा दत्त शुक्रपेभ्यो येषांभागस्थ स्वाहा ६ आपोदेवा आपोदेवामधुम
तीरगृभ्णंन्नूर्जस्वतीराजस्वश्चितानाः याभिर्मित्रावरुणावभ्यषिञ्चन्याभिरिन्द्र
मनयन्नत्यरातीः ७ द्रुपदादिव द्रुपदादिवमुमुचानः स्विन्नः स्नातोमलादिव पू
तंपवित्रेणेवाज्यमापः शुन्धन्तुमैनसः ८ शंनः शन्नोदेवीरभिष्टयऽआपोभवन्तु
पीतये शंयोरभिस्रवन्तुनः ९ अपाᳫ रसम् अपाᳫ रसमुद्वयसᳫ सूर्ये
सᳫ समाहितम् अपाᳫ रसस्ययोरसस्तंवोगृह्णाम्युत्तममुपयामगृहीतोसीन्द्रा
यत्वाजुष्टंगृह्णाम्येषतेयोनिरिन्द्रायत्वाजुष्टतमम् १० आपोदेवीः आपोदेवीरु

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

५ प्रसर्जन्मधुमतीरयक्ष्माय प्रजाभ्यः तासामास्थानादुज्जिहतामोषधयः सुपिप्प
लाः ११ पुनन्तु मा पुनन्तु मा पितरः सोम्यासः पुनन्तु मा पितामहाः पुनन्तु प्र
5 पितामहाः पवित्रेण शतायुषा पुनन्तु मा पितामहाः पुनन्तु प्रपितामहाः पवि
त्रेण शतायुषा विश्वमायुर्व्यश्नवै १२ चित्पतिर्मा चित्पतिर्मा पुनातु वाक्पति
र्मा पुनातु देवो मा सविता पुनात्वच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः तस्य
ते पवित्रपते पवित्रपूतस्य यत्कामः पुने तच्छकेयम् १३ इमंमे २ मापः २ उ
दुत्तमं २ मुञ्चन्तु मा ४ अवभृथ निचुम्पुण अवभृथ निचुम्पुण निचेरुरसि नि
चुम्पुणः अव देवैर्देवकृतमेनो यासिषमव मर्त्यैर्मर्त्यकृतं पुरराणो देव

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

अथवास्याहि ओंकारेण व्याहृतिभिर्गायत्र्याच अंतर्जलेऽघमर्षणसूक्तं त्रिरा
वर्तयेत् द्रुपदादिव २ आयं गौरिति वा ऋतं च ३ प्राणायामं वा सशिरसं ॐ
मिति वा विष्णोर्वा स्मरणं अवावसरे स्नाने जले स्नानं वारत्रयं निमज्ज्योन्मज्ज्याच
म्य स्नानांगतर्पणं कुर्यात् ॐब्रह्मादयो देवास्तृप्यंतां कंठीकृत्वा सनकाद
यो मनुष्यास्तृप्यंतां २ अपसव्येन कव्यवाडनलादयः पितरस्तृप्यंतां ३ त
तः आचम्य जलादुत्तीर्य धौतवाससी परिधाय मृद्भिरूरूकरौ प्रक्षाल्याच
म्य संध्यादिकर्म कुर्यात् आयम् आयंगौः पृश्निरक्रमीदसदन्मातरं पु
रः पितरं च प्रयन्स्वः २ अंतश्चरति अंतश्चरति रोचनास्य प्राणादपानती २

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

यवष्पन्महिषो दिवम् ३ त्रिंꣳ शद्धाम त्रिंꣳ शद्धाम विराजति वाक्पतङ्गाय धीय
ते प्रति वस्तोरह द्युभिः ४ प्राणानायम्य पुष्पाण्यंजलिमिश्राण्यूर्ध्वं प्रक्षिप्योर्ध्वबा
हुः सूर्यमुदीक्षेत उद्वयमुदुत्यंचित्रंदेवानांतच्चक्षुर्गायत्र्याचयथाशक्तिः
विभ्राडित्यनुवाकपुरुषसूक्तशिवसंकल्पमंडलब्राह्मणेरित्युपस्थायप्रदक्षि
णीकृत्य नमस्कृत्य दर्भपाणिर्यथाशक्ति मंत्रब्राह्मणादिपाठरूपब्रह्मयज्ञं
कुर्यात् उद्वयम् उद्वयं तमसस्परिस्वः पश्यंत ऽउत्तरम् देवं देवत्रा सूर्यमगन्म
ज्योतिरुत्तमम् १ उदुत्यम् उदुत्यंजातवेदसं देवं वहन्ति केतवः दृशे विश्वाय सू
र्यꣳ स्वाहा २ चित्रं देवानाम् चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुण

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative